# Shri Yugalakishorashtakam

# श्रीयुगलकिशोराष्टकम्

## Document Information

Text title : Yugalakishora Ashtakam

File name : yugalakishorAShTakam.itx

Category : vishhnu, aShTaka, rAdhA, devii, krishna, rUpagosvAmin, devI

Location : doc_vishhnu

Author : rUpagosvAmin

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 14, 2022

*sanskritdocuments.org*

# श्रीयुगलकिशोराष्टकम्

श्रीमद्रूपगोस्वामिविरचितम् ।

नवजलधरविद्युद्योतवर्णौ प्रसन्नौ
    वदननयनपद्मौ चारुचन्द्रावतंसौ ।
अलकतिलकफालौ केशवेशप्रफुल्लौ
    भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ १॥

वसनहरितनीलौ चन्दनालेपनाङ्गौ
    मणिमरकतदीप्तौ स्वर्णमालाप्रयुक्तौ ।
कनकवलयहस्तौ रासनाट्यप्रसक्तौ
    भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ २॥

अतिमतिहरवेशौ रङ्गभङ्गीत्रिभङ्गौ
    मधुरमृदुलहास्यौ कुण्डलाकीर्णकर्णौ ।
नटवरवररम्यौ नृत्यगीतानुरक्तौ
    भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ३॥

विविधगुणविदग्धौ वन्दनीयौ सुवेशौ
    मणिमयमकराद्यैः शोभिताङ्गौ स्फुरन्तौ ।
स्मितनमितकटाक्षौ धर्मकर्मप्रदत्तौ
    भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ४॥

कनकमुकुटचूडौ पुष्पितोद्भूषिताङ्गौ
    सकलवननिविष्टौ सुन्दरानन्दपुञ्जौ ।
चरणकमलदिव्यौ देवदेवादिसेव्यौ
    भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ५॥

अतिसुवलितगात्रौ गन्धमाल्यैर्विराजौ
    कति कति रमणीनां सेव्यमानौ सुवेशौ ।
मुनिसुरगणभाव्यौ वेदशास्त्रादिविज्ञौ

भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ६॥

अतिसुमधुरमूर्तौ दुष्टदर्पप्रशान्तौ
सुखरसवरदौ द्वौ सर्वसिद्धिप्रदानौ ।
अतिरसवशमग्नौ गीतवाद्यैर्वितानौ
भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ७॥

अगमनिगमसारौ सृष्टिसंहारकारौ
वयसि नवकिशोरौ नित्यवृन्दावनस्थौ ।
शमनभयविनाशौ पापिनस्तारयन्तौ
भज भज तु मनो रे राधिकाकृष्णचन्द्रौ ॥ ८॥

इदं मनोहरं स्तोत्रं श्रद्धया यः पठेन्नरः ।
राधिकाकृष्णचन्द्रौ च सिद्धिदौ नात्र संशयः ॥ ९॥

इति श्रीमद्रूपगोस्वामिविरचितं श्रीयुगलकिशोराष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Yugalakishorashtakam*

pdf was typeset on October 14, 2022

Please send corrections to *sanskrit@cheerful.com*